# Shri Vishnukritam Ganeshastotram

# શ્રીવિષ્ણુકૃતં ગણેશસ્તોત્રમ્

## Document Information

Text title : gaNeshastotram viShNukRitam brahmavaivartapurANe

File name : gaNeshastotramviShNukRitamBVP.itx

Category : ganesha, stotra, brahmavaivartapurANa

Location : doc_ganesha

Proofread by : NA

Description-comments : gaNeshakhaNDe 3 adhyAya 13 shloka 40-58

Latest update : April 2, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 19, 2024

*sanskritdocuments.org*

Shri Vishnukritam Ganeshastotram

# શ્રીવિષ્ણુકૃતં ગણેશસ્તોત્રમ્

નારાયણ ઉવાચ ।
અથ વિષ્ણુઃ સભામધ્યે તં સમ્પૂજ્ય ગણેશ્વરમ્ ।
તુષ્ટાવ પરયા ભક્ત્યા સર્વવિઘ્નવિનાશકમ્ ॥

ઈશ ત્વાં સ્તોતુમિચ્છામિ બ્રહ્મજ્યોતિઃ સનાતનમ્ ।
નૈવ વર્ણયિતું શક્તોઽસ્મ્યનુરૂપમનીહકમ્ ॥ ૧॥

પ્રવરં સર્વદેવાનાં સિદ્ધાનાં યોગિનાં ગુરુમ્ ।
સર્વસ્વરૂપં સર્વેશં જ્ઞાનરાશિસ્વરૂપિણમ્ ॥ ૨॥

અવ્યક્તમક્ષરં નિત્યં સત્યમાત્મસ્વરૂપિણમ્ ।
વાયુતુલ્યં ચ નિર્લિપ્તં ચાક્ષતં સર્વસાક્ષિણમ્ ॥ ૩॥ var વાયુતુલ્યાતિ

સંસારાર્ણવપારે ચ માયાપોતે સુદુર્લભે ।
કર્ણધારસ્વરૂપં ચ ભક્તાનુગ્રહકારકમ્ ॥ ૪॥

વરં વરેણ્યં વરદં વરદાનામપીશ્વરમ્ ।
સિદ્ધં સિદ્ધિસ્વરૂપં ચ સિદ્ધિદં સિદ્ધિસાધનમ્ ॥ ૫॥

ધ્યાનાતિરિક્તં ધ્યેયં ચ ધ્યાનાસાધ્યં ચ ધાર્મિકમ્ ।
ધર્મસ્વરૂપં ધર્મજ્ઞં ધર્માધર્મફલપ્રદમ્ ॥ ૬॥

બીજં સંસારવૃક્ષાણામઙ્કુરં ચ તદાશ્રયમ્ ।
સ્ત્રીપુંનપુંસકાનાં ચ રૂપમેતદતીન્દ્રિયમ્ ॥ ૭॥

સર્વાદ્યમગ્રપૂજ્યં ચ સર્વપૂજ્યં ગુણાર્ણવમ્ ।
સ્વેચ્છયા સગુણં બ્રહ્મ નિર્ગુણં સ્વેચ્છયા પુનઃ ॥ ૮॥

સ્વયં પ્રકૃતિરૂપં ચ પ્રાકૃતં પ્રકૃતેઃ પરમ્ ।
ત્વાં સ્તોતુમક્ષમોઽનન્તઃ સહસ્રવદનૈરપિ ॥ ૯॥ var વદનેન ચ

ન ક્ષમઃ પઞ્ચવક્ત્રશ્ચ ન ક્ષમશ્ચતુરાનનઃ ।

સરસ્વતી ન શક્તા ચ ન શક્તોઽહં તવ સ્તુતૌ ।
ન શક્તાશ્ચ ચતુર્વેદાઃ કે વા તે વેદવાદિનઃ ॥ ૧૦॥

ઇત્યેવં સ્તવનં કૃત્વા મુનીશસુરસંસદિ । var સુરેશં સુરસંસદિ
સુરેશશ્ચ સુરૈઃ સાર્દ્ધં વિરરામ રમાપતિઃ ॥ ૧૧॥

ઇદં વિષ્ણુકૃતં સ્તોત્રં ગણેશસ્ય ચ યઃ પઠેત્ ।
સાયં પ્રાતશ્ચ મધ્યાહ્ને ભક્તિયુક્તઃ સમાહિતઃ ॥ ૧૨॥

તદ્વિઘ્નનાશં કુરુતે વિઘ્નેશઃ સતતં મુને ।
વર્ધતે સર્વકલ્યાણં કલ્યાણજનકઃ સદા ॥ ૧૩॥

યાત્રાકાલે પઠિત્વા યો યાતિ તદ્ભક્તિપૂર્વકમ્ ।
તસ્ય સર્વાભીષ્ટસિદ્ધિર્ભવત્યેવ ન સંશયઃ ॥ ૧૪॥

તેન દૃષ્ટં ચ દુઃસ્વપ્નં સુસ્વપ્નમુપજાયતે ।
કદાઽપિ ન ભવેત્તસ્ય ગ્રહપીડા ચ દારુણા ॥ ૧૫॥

ભવેદ્વિનાશઃ શત્રૂણાં બન્ધૂનાં ચાપિવર્ધનમ્ । var ચ વિવર્ધનમ્
શશ્વદિઘ્નવિનાશશ્ચ શશ્વત્સમ્પગ્વિવર્ધનમ્ ॥ ૧૬॥

સ્થિરા ભવેદ્ગૃહે લક્ષ્મીઃ પુત્રપૌત્રવિવર્ધનમ્ ।
સર્વૈશ્વર્યમિહ પ્રાપ્ય હ્યન્તે વિષ્ણુપદં લભેત્ ॥ ૧૭॥

ફલં ચાપિ ચ તીર્થાનાં યજ્ઞાનાં યદ્ભવેદ્ધ્રુવમ્ ।
મહતાં સર્વદાનાનાં શ્રીગણેશપ્રસાદતઃ ॥ ૧૮॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે તૃતીયે ગણપતિખણ્ડે
શ્રીવિષ્ણુકૃતં ગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

Note : var stands for variation

Brahmavaivarta Purana, gaNesha khaNDa 3, adhyAya 13, verses 40, 41-58

---

*Shri Vishnukritam Ganeshastotram*

pdf was typeset on October 19, 2024

Please send corrections to *sanskrit@cheerful.com*